**संस्कृत-वार्ता:**

**02/10/2023**

**सायं : 06:20**

**मुख्यवार्ता**

- **प्रधानमन्त्रिणा श्रीमता नरेन्द्रमोदिना राजस्थानस्य चित्तौड़गढे भूयोऽपि सप्त-सहस्र-कोटि-रुप्यकाणां विभिन्ना: विकासात्मक-परियोजना: राष्ट्राय समर्पिता:। समुदीरितवान् च यत् एताभि: परियोजनाभि: राजस्थानस्य आधारभूत-संरचनायां परस्पर-संयोजने शिक्षायां च परिवर्तन-प्रदा: प्रभावा: आगमिष्यन्ति।**
- **दिल्ली-आरक्षि-बलेन प्रख्यात: आतंकवादी निगडित:। असौ राष्ट्रियान्वीक्षण-विभागस्य बहुचर्चित-श्रेण्या:अपि शीर्षांके आसीत्।**
- **आयुष्मान्भव इत्यभियानस्य अन्तर्गतं साम्प्रतं यावत् पञ्चाशत्सहस्राधिकैः जनैः अङ्गदानस्य संकल्पः स्वीकृतः।**
- **नोबेलपुरस्कारः त्रयोविंशत्यधिकद्विसहस्रतमवर्षस्य नोबेलाख्यः पुरस्कारः कैटालिन-कारिको ड्रू-वीसमैन इत्यस्य च कृते प्रदत्तः।**
- **एशियायि-क्रीडासु चीनस्य हांग्चोउनगरे अद्य भारतेन नव-रजतपदकानि चत्वारि कांस्यपदकानि च स्वीकृतानि। पदकतालिकायां भारतं त्रयोदशस्वर्णपदकानि द्वाविंशतिरजतपदकानि त्रयोविंशतिकांस्यपदकानि समेत्य अष्टपञ्चाशत्पदकानि विजित्य चतुर्थे स्थाने वर्तते।**

**राजस्थान-प्रधानमन्त्रीयात्रा**

**प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना राजस्थानस्य चित्तौड़गढे सप्त-सहस्र-कोटि-रूप्यकाणां विभिन्ना: विकासात्मक-परियोजना: राष्ट्राय समर्पिता:। प्रधानमन्त्री मेहसाणा-भटिण्डा-गुरदासपुर-वातीयेन्धन-नलिकाया: अपि लोकार्पणं कृतवान्। या: पञ्चचत्वारिंशत् शत-कोटि-रूप्यकाणां व्ययेन विनिर्मिता: सन्ति। प्रधानमन्त्रिणा या: रेलवे-परियोजना: समर्पिता: तासु चित्तौड़गढ-नीमच-रेलवे-पट्टिकाया: कोटा-चित्तौड़गढ़-वैद्युतीय-रेलवे-पट्टिकायाश्च द्विगुणीकरणेन सम्बद्धा: परियोजना: सम्मिलिता: वर्तन्ते। प्रधानमन्त्री स्वदेश-दर्शन-योजनाया: अन्तर्गतं नाथद्वारास्थे विकसित-पर्यटन-सौविध्यानामपि लोकार्पणम् विहितवान्। कार्यक्रमं सम्बोधयन् प्रधानमन्त्री समुदीरितवान् यत् - चित्तौडगढे प्रारब्धाभि: एताभि: परियोजनाभि:**

राजस्थानस्य आधारभूत-संरचनायां परस्पर-संयोजने शिक्षायां च परिवर्तन-प्रदा: प्रभावा: आगमिष्यन्ति, जनानां जीवनमपि सारल्यमवाप्स्यति। असौ प्रावोचत् यद् निम्न-क्षेत्राणां विकास: तस्य प्रशासनस्य प्राथमिकता वर्तते। असौ अग्रे निगदितवान् यत् प्रशासनेन देशस्य आकांक्षि-जनपदानां चयनं कृतम्। यत्र विकासकार्याणि समाचर्यन्ते। राजस्थानस्यापि अनेके जनपदा: अस्या: योजनाया: अन्तर्गतं विकसिता: भवन्ति। प्रशासनेन आकांक्षि-प्रखण्डानां विकासाय कार्यं समारब्धम्। वञ्चितेभ्य: प्राथमिकतां प्रदातुं वाइब्रेंट-विलेज इति कार्यक्रम: अपि समारब्ध:, यस्य अन्तर्गतं सीमवर्ति-ग्रामाणां विकासो भवति।

<u>दिल्ली-आरक्षि-आतंकि</u>

दिल्ली-आरक्षि-बलेन प्रख्यात: आतंकवादी निगडित:। अयं आतंकवादी पुणे ISIS इत्यस्य आतंकिसमूहस्य सदस्यो वर्तते। असौ राष्ट्रियान्वीक्षण-विभागस्य बहुचर्चित-श्रेण्या:अपि अतिवाञ्छितः आसीत्। तस्मिन् त्रिलक्षरूप्यकाणां पुरस्कार: अपि आसीत्। दिल्ली-आरक्षि-बलस्य विशेष-प्रकोष्ठेन आतंकी-क्रियात्मक-समूहस्य अन्ये जना: अपि निगडिता:। क्रियात्मक-समूहोऽयं विदेशस्थितैः प्रबन्धकै: निर्देशं स्वीकृत्य उत्तरभारते आतंकी घटनाया: योजनां विनिर्माति स्म। आरक्षि- बलेन अवैध-सामग्र्य: अपि अधिगता:।

<u>गांधी जयन्ती</u>

राष्ट्रम् अद्य राष्ट्रपित्रे महात्मागांधिवर्याय तस्य चतु: पञ्चाशदधिकैकतमी विदेशे च भारतीय-अभियान-सम्बद्ध-समारोहाणाम् एका शृङ्खला आयोज्यते। राष्ट्रिय-राजधान्या: राजघाटस्थले राष्ट्रपितु: समाधिस्थले सर्व-धर्म-प्रार्थना-सभाया: आयोजनम् अभवत्। राष्ट्रपति: द्रौपदीमुर्मू: उपराष्ट्रपति: जगदीप-धनखड: प्रधानमन्त्री नरेन्द्रमोदी च अद्य प्रात: राजघाटे महात्म-गान्धिने पुष्पाञ्जलिं समर्पितवन्त:। पुष्पाञ्जलि-अर्पितवत्सु जनेषु लोकसभाध्यक्ष: ओम्-बिरला: केन्द्रीयमन्त्री हरदीपसिंह-पुरी डॉ.जितेन्द्रसिंह: मीनाक्षी लेखी कॉग्रेसाध्यक्ष: मल्लिकार्जुनखडगे च सम्मिलिता: वर्तन्ते।। राष्ट्रपतिपदासीना द्रौपदीमुर्मू: प्रोक्तवती यद् महात्मगान्धिन: सत्याहिंसयो: प्रयोगादर्शेन सम्पूर्णविश्वाय नवीनमार्ग: आविष्कृतः अनेन सहैव गांधिवर्येण आजीवनं न केवलं अहिंसाया: कृते

अपितु स्वच्छता-महिलासशक्तिकरण-आत्मनिर्भर-कृषकाणां अधिकारेभ्य: अपि संघर्ष: कृत:। स्वकीये सन्देशे उपराष्ट्रपतिना प्रोक्तं यत् महात्मगांधिवर्यस्य सत्य-अहिंसयो: सिद्धान्त: औपनिवेशिक-शासनं विरुध्य भारतस्य स्वतन्त्रता-संघर्षे मार्गदर्शक: आसीत्। प्रधानमन्त्री कथितवान् यत् महात्मगांधि-वर्यस्य कालविजयशिक्षा: अस्माकं मार्गदर्शनं कुर्वन्ति। तेनोक्तं यद् गांधिवर्यस्य प्रभाव: वैश्विको वर्तते। य: सम्पूर्ण-मानव-जातिं एकता-करुणयो: भावनां चाग्रे सवंर्धयितुं प्रेरयति। भारते फ्रांसीसीय-दूतावासेन अद्य महात्मगांधिवर्याय श्रद्धाञ्जलि: समर्पितः। प्रोक्तं च-यत् फ्रांसदेशेन महात्मगांधि-वर्येण उल्लिखितानि अहिंसा-शान्ति-सहिष्णुताया-मूल्यानि यथावत् संस्थापितानि। अद्य पूर्व-प्रधानमन्त्रिणे लालबहादुर शास्त्रिवर्याय चापि तस्य जयन्तुपलक्ष्ये राष्ट्रपति: द्रौपदीमुर्मू: उपराष्ट्रपति: जगदीप धनखड: प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रिय-राजधान्यां लाल-बहादुर-शास्त्रिवर्यस्य स्मारके विजय-घाटे तस्मै पुष्पांजलिं समर्पितवन्त:। प्रधानमन्त्री श्रीमोदी अभिव्यक्तवान् यत् शास्त्रिवर्यस्य सरलता राष्ट्रं प्रति तस्य समपर्णं जयजवान् जयकिसान इति उद्घोषः च अद्यापि सोत्साहं समुद्घोष्यते। आगामिवंशानुक्रमाय चापि प्रेरणां प्रददाति। भारतस्य च प्रगतौ तस्य अविभाज्य प्रतिबद्धतां समस्यापूर्णसमयावधौ च तस्य नेतृत्वम् अनुकरणीयमस्ति।

<u>माण्डविया- अङ्गदानम् -</u>

आयुष्मान्भव इत्यभियानस्य अन्तर्गतं साम्प्रतं यावत् पञ्चाशत्सहस्राधिकैः जनैः अङ्गदानस्य संकल्पः स्वीकृतः। गतमासे गुजरातस्य गान्धीनगरे इमा योजना समारब्धा। केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री मनसुखमाण्डवियाः साग्रहं निवेदितवान् यत् जनाः अङ्गदानाय संकल्पं कुर्वन्त्विति।

<u>नोबेलपुरस्कारः</u>

त्रयोविंशत्यधिकद्विसहस्रतमवर्षस्य नोबेलाख्यः पुरस्कारः कैटालिन-कारिको ड्रू-वीसमैन इत्यस्य च कृते प्रदत्तः। अस्य वर्षस्य प्रदीयमानस्य नोबल इत्याख्यस्य पुरस्कारस्य़ घोषणा संजाता। अस्य वर्षस्य अयं पुरस्कारः औषधिफिजियोलाजी इत्यनयोः च क्षेत्रयोः कृते प्रदत्तः। न्यूक्लियोसाइड-इत्याधारित-संशोधन-सम्बद्ध-

अन्वेषणार्थं अयं पुरस्कारः एतयोः द्वयोः वैज्ञानिकयोः कृते प्रदत्तः। एतयोः द्वयोः अन्वेषणैः कोविड-19 इत्येतं विरुध्य प्रभावि-एम-आर-एन-ए-सूच्यौषधीनां विकासः सक्षमीकृतः।

## प्रधानमन्त्री-जम्मू-कश्मीर

प्रधानमन्त्री श्रीनरेन्द्रमोदी स्वच्छ-भारताभियानस्य द्वितीय-चरणस्य अन्तर्गतं क्रियात्मक श्रेण्यां शतप्रतिशतं मुक्त-मलत्याग-रहितानां मुक्तानाञ्च समर्जितानां ग्रामाणां कृते जम्मूकाश्मीरस्य प्रशंसां विहितवान्। एकस्मिन् सामाजिक-अन्न्तर्जाल-सन्देशे असौ प्रोदीरितवान् यत् स्वच्छ-स्वस्थ-भारतस्य दिशि एक: महत्त्वपूर्ण: पदक्षेपो वर्तते। केन्द्रीय गृहमन्त्रिणा अमितशाहेनाऽपि जम्मूकश्मीरस्य जनेभ्य: वर्धापनानि प्रदत्तानि। असौ कथितवान् यत् अनुच्छेद-सप्तत्यधिकत्रिशतं इत्यस्य निरसनान्तरं केन्द्रशासितप्रदेशेन प्रभूतो विकास: समर्जित:। केन्द्रप्रशासनेन प्रचाल्यमानाः योजना: सम्प्रति जम्मू-कश्मीरस्य प्रत्येकं क्षेत्रं प्रति गच्छन्ति। तत्रत्यनिवासिनः आगतानि परिवर्तनानि स्वीये जीवने एव अवलोकयन्तः सन्ति।

## जम्मू-कश्मीा-मूर्तेः अनावरणं

जम्मू-कश्मीरे उपराज्यपालेन मनोजसिन्हावर्येण अद्य श्रीनगर-लोक-सचिवालये राष्ट्रपितुः जयन्त्यवसरे श्रद्धाञ्जलिस्वरूपेण महात्म-गान्धिन: प्रतिमाया: तस्य च तन्तुवायचक्रस्य स्थापनाया: अनावरणं कृतम्। उपराज्यपालेन कथितं यद् राष्ट्रपिता सर्वदा कथयति स्म, यत् एतस्य तन्तुवायचक्रस्य संदेश: तस्य मूर्त-परिधे: इतोऽपि व्यापको वर्तते। तेनोक्तं यत् अस्य चक्रस्य लक्ष्यं मानवजाते: सेवा हिंसारहित-जीवनं मूलधन-श्रमयोर्मध्ये सन्धे: स्थापनं चास्ति। श्रीसिन्हा: प्रावोचत् यद् गान्धिवर्येण अस्य तन्तुवाय-चक्रस्य उपयोग: आङ्ग्लशासकान् विरुध्य जायमाने संघर्षे महत्वपूर्ण-शस्त्ररूपेण कृत: आसीत्।

**एशियायि-क्रीडा-**

**एशियायि-क्रीड़ासु चीनस्य हांग्चोउ-नगरे अद्य भारतेन नवरजतपदकानि चत्वारि कांस्यपदकानि चाधिकृतानि । पदक-तालिकायां भारतं त्रयोदशस्वर्णपदकानि द्वाविंशतिरजतपदकानि त्रयोविंशतिकांस्यपदकानि च समेत्य अष्टपञ्चाशत्पदकानि विजित्य चतुर्थं स्थानं भजते।**

**।। इति वार्ता: ।।**